# ॥ वाल्मीकि रामायण॥

## ५ सुन्दरकाण्ड

### अध्याय ४०

ततः पक्षिनिनादेन वृक्षभङ्गस्वनेन च ।
बभूवुस्त्राससम्भ्रान्ताः सर्वे लङ्कानिवासिनः ॥ १॥

विद्रुताश्च भयत्रस्ता विनेदुर्मृगपक्षुणः ।
रक्षसां च निमित्तानि क्रूराणि प्रतिपेदिरे ॥ २॥

ततो गतायां निद्रायां राक्षस्यो विकृताननाः ।
तद्वनं ददृशुर्भग्नं तं च वीरं महाकपिम् ॥ ३॥

स ता दृष्ट्व महाबाहुर्महासत्त्वो महाबलः ।
चकार सुमहद्रूपं राक्षसीनां भयावहम् ॥ ४॥

ततस्तं गिरिसङ्काशमतिकायं महाबलम् ।
राक्षस्यो वानरं दृष्ट्वा पप्रच्छुर्जनकात्मजाम् ॥ ५॥

कोऽयं कस्य कुतो वायं किंनिमित्तमिहागतः ।
कथं त्वया सहानेन संवादः कृत इत्युत ॥ ६॥

आचक्ष्व नो विशालाक्षि मा भूत्ते सुभगे भयम् ।
संवादमसितापाङ्गे त्वया किं कृतवानयम् ॥ ७॥

अथाब्रवीत्तदा साध्वी सीता सर्वाङ्गशोभना ।
रक्षसां कामरूपाणां विज्ञाने मम का गतिः ॥ ८॥

यूयमेवास्य जानीत योऽयं यद्वा करिष्यति ।
अहिरेव अहेः पादान्विजानाति न संशयः ॥ ९॥

अहमप्यस्य भीतास्मि नैनं जानामि कोऽन्वयम् ।
वेद्मि राक्षसमेवैनं कामरूपिणमागतम् ॥ १०॥

वैदेह्या वचनं श्रुत्वा राक्षस्यो विद्रुता द्रुतम् ।
स्थिताः काश्चिद्गताः काश्चिद्रावणाय निवेदितुम् ॥ ११॥

रावणस्य समीपे तु राक्षस्यो विकृताननाः ।
विरूपं वानरं भीममाख्यतुमुपचक्रमुः ॥ १२॥

अशोकवनिका मध्ये राजन्भीमवपुः कपिः ।
सीतया कृतसंवादस्तिष्ठत्यमितविक्रमः ॥ १३॥

न च तं जानकी सीता हरिं हरिणलोचणा ।
अस्माभिर्बहुधा पृष्टा निवेदयितुमिच्छति ॥ १४॥

वासवस्य भवेद्दूतो दूतो वैश्रवणस्य वा ।
प्रेषितो वापि रामेण सीतान्वेषणकाङ्क्षया ॥ १५॥

तेन त्वद्भूतरूपेण यत्तत्तव मनोहरम् ।
नानामृगगणाकीर्णं प्रमृष्टं प्रमदावनम् ॥ १६॥

न तत्र कश्चिदुद्देशो यस्तेन न विनाशितः ।
यत्र सा जानकी सीता स तेन न विनाशितः ॥ १७॥

जानकीरक्षणार्थं वा श्रमाद्वा नोपलभ्यते ।
अथ वा कः श्रमस्तस्य सैव तेनाभिरक्षिता ॥ १८॥

चारुपल्लवपत्राढ्यं यं सीता स्वयमास्थिता ।
प्रवृद्धः शिंशपावृक्षः स च तेनाभिरक्षितः ॥ १९॥

तस्योग्ररूपस्योग्रं त्वं दण्डमाज्ञातुमर्हसि ।
सीता सम्भाषिता येन तद्वनं च विनाशितम् ॥ २०॥

मनःपरिगृहीतां तां तव रक्षोगणेश्वर ।
कः सीतामभिभाषेत यो न स्यात्त्यक्तजीवितः ॥ २१॥

राक्षसीनां वचः श्रुत्वा रावणो राक्षसेश्वरः ।
हुताग्निरिव जज्वाल कोपसंवर्तितेक्षणः ॥ २२॥

आत्मनः सदृशाञ्शूरान्किङ्करान्नाम राक्षसान् ।
व्यादिदेश महातेजा निग्रहार्थं हनूमतः ॥ २३॥

तेषामशीतिसाहस्रं किङ्कराणां तरस्विनाम् ।
निर्ययुर्भवनात्तस्मात्कूटमुद्गरपाणयः ॥ २४॥

महोदरा महादंष्ट्रा घोररूपा महाबलाः ।
युद्धाभिमनसः सर्वे हनूमद्ग्रहणोन्मुखाः ॥ २५॥

ते कपिं तं समासाद्य तोरणस्थमवस्थितम् ।

अभिपेतुर्महावेगाः पतङ्गा इव पावकम् ॥ २६॥

ते गदाभिर्विचित्राभिः परिघैः काञ्चनाङ्गदैः ।
आजघ्नुर्वानरश्रेष्ठं शरैरादित्यसंनिभैः ॥ २७॥

हनूमानपि तेजस्वी श्रीमान्पर्वतसंनिभः ।
क्षिताविविध्य लाङ्गूलं ननाद च महास्वनम् ॥ २८॥

तस्य संनादशब्देन तेऽभवन्भयशङ्किताः ।
ददृशुश्च हनूमन्तं सन्ध्यामेघमिवोन्नतम् ॥ २९॥

स्वामिसन्देशनिःशङ्कास्ततस्ते राक्षसाः कपिम् ।
चित्रैः प्रहरणैर्भीमैरभिपेतुस्ततस्ततः ॥ ३०॥

स तैः परिवृतः शूरैः सर्वतः स महाबलः ।
आससादायसं भीमं परिघं तोरणाश्रितम् ॥ ३१॥

स तं परिघमादाय जघान रजनीचरान् ॥ ३२॥

स पन्नगमिवादाय स्फुरन्तं विनतासुतः ।
विचचाराम्बरे वीरः परिगृह्य च मारुतिः ॥ ३३॥

स हत्वा राक्षसान्वीरः किङ्करान्मारुतात्मजः ।
युद्धाकाङ्क्षी पुनर्वीरस्तोरणं समुपस्थितः ॥ ३४॥

ततस्तस्माद्भयान्मुक्ताः कति चित्तत्र राक्षसाः ।
निहतान्किङ्करान्सर्वान्रावणाय न्यवेदयन् ॥ ३५॥

स राक्षसानां निहतं महाबलं
निशम्य राजा परिवृत्तलोचनः ।
समादिदेशाप्रतिमं पराक्रमे
प्रहस्तपुत्रं समरे सुदुर्जयम् ॥ ३६॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com